This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 170 विषय वैदिक

नाव. आश्वलायन गृह्यसूत्र (mss)

लेखक/लिपीकार —

पृष्ठ 28 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



गृ॰ सू॰ ॥ १॥

श्रीगणेशायनमः॥श्रीगुरुचरणाभ्यांनमः॥श्रीवेदपुरुषायनमः॥ ॥हरिः ॐ॥
उक्तानिवैतानिकानिगृह्यानिवक्ष्यामस्तत्रयः पाकयज्ञाहुताःअग्नौहूयमानाज
नग्नौप्रहुताब्राह्मणभोजनेब्राह्मणेहुताअथाप्यत्रउदाहरंतियःसमिधायः
आहुतीयोवेदनेतिसमिधमेवापिश्रद्दधानःआदधन्मन्यतेयजइदमितिनम
स्तस्मैयआहुत्यायोवेदनेतिविद्यायैवाप्यस्तिप्रीतिस्तदेतत्सश्यन्तऋषिरुवाच॥
अगारुधायगविषेद्युक्षायदस्म्यवचेः॥घृतस्वादीयोमधुनश्चवोचतेतिवच
एवमइदंघृतान्नंमधुनश्चस्वादीयोस्तिप्रीतिस्वादीयास्तियवतदाह॥अथा श्रीराम
तेअग्नऋचाहविर्दातंभरामसि॥तेतेभवंतूक्षणऋषभासोवशाउतेय ॥१॥
व तएँमउक्षाणश्चऋषभाश्चवशाश्चभवंतियइमंस्वाध्यायमधीयतइतियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्कारेण वैखल्वपिनवैदेवानमस्कारमतियज्ञोवैनमइ
तिहिब्राह्मणंभवति॥१॥अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्नि
होत्रदेवताभ्यःसोमायवनस्पतयेश्रीषामाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यां
धन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणस्वाहेत्यथबलिहरणमेताभ्यश्चैव
देवताभ्योऽन्नौषधिवनस्पतिभ्योग्रहायग्रहदेवताभ्योवास्तुदेवताभ्य
इंद्रायेंद्रपुरुषेभ्योयमायेयमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यस्सोमाय
सोमपुरुषेभ्यइतिप्रतिदिशंब्रह्मणब्रह्मपुरुषेइतिमध्येविश्वेभ्योदेवेभ्य
स्सर्वेभ्योभूतेभ्योदिवाचारिभ्यइतिदिवानक्तंचारिभ्यइतिनक्तंरक्षोभ्य
इत्युत्तरतःस्वधापितृभ्यइतिप्राचीनावीतीशेषंदक्षिणानिनयेत्॥२॥

अथपरिषेचनं॥अथग्रहबलिदेवतानांकीर्तयिष्यामोयत्रयत्रवसंतिते॥ह्रारेपितामह
विधोब्रह्मकीळेचतुमापतिं॥आग्नेयांबलभद्रंवयमविष्णुंचदक्षिणे॥नैर्ऋत्यांस्कं
दंवरुणेसोमंसूर्यंचपश्चिमे॥वायव्यामश्विनौवसवःसोमोरुद्रउत्तरस्यांदि
शि॥ईशान्यांनक्षत्राणींद्रग्रहाःपूर्वस्यांदिशि॥ग्रहमध्येब्रह्माणंप्रतिष्ठाप्य
ऋद्धिवृद्धिःश्रियाकीर्तिरितितत्स्मार्तबलित्रयंग्रहाणांदत्वाविहितं॥येभूताः
प्रचरंतिदिवानक्तंबलिमिछंतोविदुरस्यप्रेषाःतेभ्योबलिंपुष्टिकामोहरामि
मयिपुष्टिंपुष्टिपतिर्दधातुस्वाहा॥इंद्रवारुणवायव्यांयाम्यांनैर्ऋतिकाश्च
ये॥तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडोमयोज्झितं॥वैवस्वतकुलेजातौद्वौश्यामौ
शबलौश्वनौ॥ताभ्यांपिंडोमयादत्तोरक्षेतांपथिमांसदा॥श्वचांडालभूत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतितंवायसेभ्योन्तर्भूमौनिक्षिपेत्॥यमोसियमहतोसिवायसोसिनमोस्तुते॥सप्तजन
मकृतंपापंबलिंभक्षतुवायसः॥गोदोहनमात्रंतत्रस्थित्वातिष्ठमाकाङ्क्षेद्धस्तोपादोप्र
क्षाल्याचम्यगृहंप्रवेशयेत्॥शांताद्यौर्वीशिवमंतरिक्षंयोनौदेव्यभयन्नोअस्तु॥
शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतः॥शांतिःशांतिरशांतिः॥
॥१॥इतिपरिशिष्टं॥अथखलुयत्रकचहाथन्त्यादिषुमात्रावरंसर्वतस्तिलमुप
लिप्योद्धिरण्यपङ्क्तेरवाउदगायतांपश्चात्प्रागायतेनानांतयोस्तिस्रोमध्येतदग्न्युत्पा
द्यंप्रतिष्ठाप्यान्वाधायपरिसमुह्यपरिस्तीर्यपुरस्ताद्दक्षिणतःपश्चादुत्तरतइत्क
दक्षंसंस्तृणंतृणंपर्युक्षणंपवित्राभ्यामाज्यस्योत्पवनमग्नौनाभावनंतर्गर्भौभ्रादेत्रा
मात्रोकुशोनानांतयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यांसवि

श्रीराम्
२

तुष्कायप्रसवउत्सुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरितिप्राणमुत्सुनातिसकृ
न्मंत्रेणहिस्तूष्णीकृतमाज्यहोमेषुपरिस्तरणंतथाज्यभागोपाकयज्ञेषुब्रह्मावध
त्वंतरियज्ञशूलगववर्जंमुष्मैस्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मत्व
नादेशेएकबर्हिरित्याज्यस्विष्टकृतःस्युस्तुल्यकालास्तदपाग्नियज्ञगाथागीयते॥पा
कयज्ञान्त्समासायैकाज्यानेकबर्हिषः॥एकस्विष्टकृतःकुर्यान्नानाग्निसतिदेवतइति
॥३॥उदगयनआपूर्यमाणपक्षैकल्याणेनक्षत्रेवोलूकर्मोपनयनगोदानविवाहाः
सार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्याहुतीर्जुहुयादग्नआयूंषिपवसइति
तिसृभिःप्रजापतेनत्वदेतान्यन्यइतिचव्याहृतिभिर्वासमुच्चयमकेनैकेकांचनत्वम
र्यमाभवसियत्कनीनामितिविवाहेचतुर्थी॥४॥कुलमग्रेपरीक्षेतयेमाहतःपित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तश्चेतियथोक्तंपुरस्ताद्बुद्धिमतेकन्यांप्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामु
पयच्छेतद्दुर्विज्ञेयानिलक्षणान्यस्योपिंडान्कृत्वाकृतमंत्रंप्रथमंजप्त्वाऽकृतेसत्यंप्रतिष्ठि
तंयस्यिंकुमार्यभितोजातदियमिहप्रतिपद्यतांयत्सत्यंतदस्यतामितिपिंडानभि
मंत्र्यकुमारीब्रूयादेषामेकंगृह्णीतिसचान्येनोभयतःसस्यादूणहीयादन्यतरस्याः
प्रजाभविष्यतीतिविद्याद्गृह्णात्यशुमतीवेदिपुरीषाद्वाह्यवचस्विन्यविहासिनोहरा
सर्वसंपन्नादेवनालिंतवीचतुष्पथाद्वाप्रव्राजिनीरिणादधन्याश्मशानात्यति
घ्नीं ॥ ५ ॥ अलंकृत्यकन्यामुदकपूर्वंददातिदेवब्राह्मोविवाहस्तस्याजातोद्वादशाव
रान्हादशापरान्पुनात्युभयतऋत्विजोवितते कर्मणिदद्दालंकृत्यसदैवोदशावरान्
दशपरान्पुनात्युभयतःसहधर्मचरतइतिप्राजापत्योष्टावरानष्टपरान्पुनात्युभयतो

गोमिथुनंदत्वोपयच्छेतसआर्षःषडावरान्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपय
च्छेतसगाथयाधनेनोपतोष्योपयच्छेतआसुरःसुप्तानाप्रमत्तानावापहरेत्सपेशाचोहृत्वा
भित्वाचशीर्षाणिरुदतींरुदद्भ्योहरेत्सराक्षसः ॥ ६ ॥ अथरथेहूयमानेवाजिनपृथमा
ग्रामथर्माश्वेतानिवाहेप्रतीयाद्यद्युसमानंतद्दृश्यामःपश्चादग्नेर्ध्रुवमश्मानंप्रतिष्ठा
प्योत्तरपुरस्ताद्दृषदुपलंसमन्वारभ्यायाद्ध्रुवातिष्ठन्प्रत्यङ्मुखःप्राङ्मुख्याआसीनाया
दक्षिणामितेसौभगत्वायहस्तमित्यनुष्टभंवधूर्ग्रहीयाद्यदिकामयीतपुमांसएवमेपुत्रा
जायेरंनित्यंगुलीरवस्त्रीकामारामांतेहस्तंसांगुष्ठमुभयकामःप्रदक्षिणमग्निमुद
कुंभंत्रिःपरिणयंजुपत्यमोहमस्मिसात्वंसात्वमस्यमोहंयोरुहंपृथिवीत्वंसामा
हमुत्कंतावहविवहादु ॥ प्रजांप्रजनयावहैसुप्रियौरोचिष्णुसुमनस्यमानोजीवंव
शरदःशतमितिपरिणीयपरिणीयाश्मानमारोहयतीममश्मानमारोहाश्मेवत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिरोभवं सहस्वष्टनायतोभितिष्ठघृतन्यतइतिवृध्वंजलावुपस्तीर्यभ्रातास्यालाजानावपतिन्निर्जामदग्न्यानांप्रत्यभिघार्यहविरवत्तेषांवदानथमीर्यमणंदु
वाहिर्लाजानावपतिन्निर्जामदग्न्यानांप्रत्यभिघार्यहविरवत्तेषांवदानथमीर्यमणंदु
देवकन्याअग्निमयक्षत सइमांदेवोअर्यमाप्रेतोमुंचातुनामुतःस्वाहा॥वरुणस्तु
देवकन्याअग्निमयक्षत सइमांदेवोवरुणःप्रेतोमुंचातुनामुतःस्वाहा॥पूषणस्तु
देवकन्याअग्निमयक्षत सइमांदेवःपूषाप्रेतोमुंचातुनामुतःस्वाहेत्यविछिद्यंज
लिरुक्त्वेवजुहुयादपरिणीयश्वपुदनाभ्यात्सहस्त्रीचतुर्थमाप्याप्यहेकलाजान्य
रिणयंतिनथोन्तमेआहुतीनसन्निपतंतोथास्यैत्रिरवदिसुंचतियदिकृतेभवतऊ
र्णास्नुकेकेत्रापक्षयोर्वाभवतःप्रत्वामुंचामिवरुणस्यपाशादित्यृक्षत्तरामुत्तरयार्थे
नामपराजितायांदिशिसप्तपदान्यभ्युक्रामयतीषएकपदीद्विपदीरायस्पोषाय
त्रिपदीमायोभव्यायचतुष्पदीप्रजाभ्यःपंचपद्यृतुभ्यःषड्वयोसप्तपदीभव

सामामनुव्रताभव॥पुत्रान्विंदावहैबहूंस्तेसंतुजरदष्टयइत्युभयोःसन्निधायशिरसीउद
कुंभेनावसिच्यब्राह्मण्याश्चदक्षायाजीवपत्याजीवप्रजायाअगारएतारात्रीवसेद्ध्रु
वमरुंधतीसप्तऋषीनितिदृष्ट्वावविसृजेतजीवपत्नीप्रजांविंदत्येति॥७॥प्रयाणे
उपपद्यमानेपूषालेतोनयतुहस्तगृह्यतियानमारोहयेदश्मन्वतीरीयतेसंरभध्वमित्य
ूर्वेनावमारोहयेदुत्तरेणाक्रमयेज्जीवरुदतीतिरुदत्यांविवाहाग्निमयतोजस्त
नयंतिकल्याणेषुदशवृक्षचतुष्पथेषुमाविदत्परिपंथिनइतिजपेद्वासेवाससुमंगली
रियंवधूरितीक्षकानीक्षेतेहप्रजांप्रजयातेसमृध्यतामितिगृहंप्रवेशयेद्विवाहाग्नि
मुपसमाधायपश्चादस्यानुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मिन्नुपविष्टायां
समन्तारभ्यायमानःप्रजांजनयतुप्रजापतिरितिचतसृभिःप्रत्यृचंहुत्वोमंजंतु
विश्वेदेवाइतिदध्नःप्राश्यप्रतिप्रयतेराज्यशेषंवानक्तिहृदयंतऊर्ध्वमश्मालव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौस्यातांत्रिरात्रंहादशरात्रंसंवत्सरं
वैकऋषिर्जायतइतिचरितव्रतःसूयौविदेवधूवस्त्रंदद्याद्दन्नंब्राह्मणेभ्योथस्यस्य
यनंवाक्षयीतेत्याणिग्रहणादिग्रहंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुर्यादेतेवा
सीवानित्यानुग्रहीतस्योद्यादितूपशाम्येत्पल्युवपेसेदित्येकेतस्याग्निहोत्रेणप्राङ्
कृणहोमकालोव्याख्यातोहोम्यंचमांसवर्जंकामंतुव्रीहियवतिलैरग्नयेस्वा
हेतिसायंजुहुयात्सूर्यायस्वाहेतिप्रातस्तूष्णीद्वितीयउभयत्र॥९॥अथपार्वण
स्थालीपाकस्तस्यदर्शपूर्णमासाभ्यामुपवासदध्नाबर्हिषाभ्रसन्नहनेदेवताभ्यो
पांशुयाजेइमहेंद्रवर्जंकाम्याइतस्तेरौस्यतस्यैदेवतायैचतुरश्चतुरोमुष्टीन्नि
र्वपतिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामीत्यथैनान्प्रोक्षतियथानिरुप्त

मसुष्मैत्वाजुष्टंप्रोक्षामीत्यवहतांस्त्रिःफलीकृतींनाग्नयेसमोप्यवायदिनाना
श्रपयेहिभज्यतंडुलानभिघारोदग्मुष्णादग्मुष्णातियदुवेसमाप्यस्रुक्षारंजुहुयाच्छ
तानिहवींष्यभिघार्यार्धहुत्वास्यबर्हिष्यासाद्यप्रत्यभिघार्यार्धमभिघार्यार्धंतदग्मआ
त्माजातवेदस्तनूपास्ववर्धस्वचवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येन
समेधयस्वाहेतिदक्षिणाग्नावाघारावाघार्यौज्यभागौजुहुयादग्नयेस्वाहासोमायस्वा
हेत्युत्तरमाग्नेयंदक्षिणंसोम्यंविलायतेचक्षुषीवाएतेयज्ञस्ययदाज्यभागौतस्मा
त्पुरुषस्यप्रत्यङ्ङुत्तस्यासीनस्यदक्षिणमक्ष्युत्तरंभवत्युत्तरंदक्षिणंमध्येहवींषि
प्रत्यक्करंवाग्नेयंसंस्रुवस्रुचानिवोत्तरंस्रुक्सोविष्कृतमध्यात्पूर्वोर्द्धश्च
हविषोवयतिमध्यात्पूर्वार्द्धीत्यश्वार्द्धादितिपंचावत्तिनामुत्तरार्द्धात्सोविष्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतेनात्रहवींषिप्रत्यभिघारयतिस्विष्टकृतंहिरभिघायतिय इत्यकर्मणोऽ
तिरिक्तंयद्यान्यूनमिहाकरं॥अग्निष्टत्स्विष्टकृद्धिहान्तसर्वंस्विष्टंसुकृतंकरोतुमे॥
अग्नयस्विष्टकृतेसुकृतेसुकृतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्द्धयित्रेस
र्वान्तःकामान्त्समर्द्धयस्वाहेतिबर्हिभिपूर्णपात्रंनिनयेदेषवोवषट्थः पाकय
ज्ञानामेतन्नत्रहविरुच्छिष्टदक्षिणा॥१०॥अथपशुकल्पउत्तरतोग्नेःशामित्र
स्यायतनंकृत्वोपाययित्वापशुमाप्लाप्यपुरस्तात्स्रुत्यंशुखमवस्थाप्याग्नि
दूतमितिद्वाभ्याङ्कृत्वासपलाशयाईशाखयोपश्चादुपस्पृशेदमुष्मैत्वाजुष्टम्
पाकरोमीतिश्रीहियवमतीभिरद्भिःपुरस्तात्प्रोक्षत्यमुष्मैत्वाजुष्टंप्रोक्षामीति
तासापाययित्वाक्षिणमनुबाङ्शोषन्निनयेद्वहतेवपर्याग्निकृत्वोदच्यं

नयंतिंतस्यपुरस्तादुल्मुकंहरंतिशामित्रंएषभवतिवपाश्रपणीभ्यांकृत्तापशुमन्वा
रब्धेकर्तारंयजमानःपश्चाच्छामित्रस्यप्राक्शिरसंप्रत्यक्शिरसंवोदक्पादंसह
व्यपुरानाभेस्तूष्णमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांपरिगृह्या
द्भिरभिषिञ्चशामित्रंप्रताप्याग्नेणेनमग्निंहृत्वादक्षिणतआसीनःश्रपयित्वोप
रीत्यजुहुयादेतस्मिंनवाग्नौस्थालीपाकंश्रपयंत्येकादशपशोरवदानानिसर्वेगि
ष्यावदायशामित्रंश्रपयित्वाहृदयंशूलप्रताप्यस्थालीपाकस्यायतोजुहुयाद्
वदानेवीसहैकैकस्यावदानस्यहिहिरण्यत्यावृतेवैहृदयंशूलेनचरति॥११॥चे
त्ययतेप्राक्स्विष्टकृतश्चेत्यायबलिंहरेद्यद्युवैविदेशस्यपलाशदूतेनयत्रवेथव
नस्यतइत्येतयर्चाहोपिंडौकृत्वावीवधेभ्याधायदूतायप्रयतेहिमंतस्मैबलिंहरति
चेनंब्रूयादयंतुभ्यमितियोदूतायप्रतिभयंवेदंतरोशस्त्रमपिकिंचिन्नाध्याचेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नयंतरोषुवरूपमपिकिंचिदनेनतरितव्यमितिधन्वंतरियैब्रह्माणोमग्नेश्चांतरा
पुरोहितायाग्नेबलिंहरेत्॥१२॥उपनिषद्गर्भलंभनंपुंसवनमनवलोभनंचय
दितीयोत्तृतीयगर्भमासेतिथ्यणोषितायाःसरूपवत्सायागोर्दध्निहोतुमा
वोयवंवदधिप्रस्तेनप्राशयेत्किंपिबसिकिंपिबसीतिपुरुषपुंसवनपुंसवनमि
तित्रिःप्रतिजानीयादेवंत्रीन्प्रस्तानथास्यैमंडलागारद्वाराद्दक्षिणस्यांना
सिकायामजीतामोषधीन्नस्तःकरोतिप्रजावज्जीवपुत्राभ्यांहेक॥आतेगर्भोयो
निमेतुपुमान्बाणइवेषुधिं॥आवीरोजायतांपुत्रस्तदेशमास्यः॥अग्निरेतुप्रथमो
देवतानांसोस्यैप्रजांमुंचतुमृत्युपाशात्॥तदयंराजावरुणोमैत्र्यतीयथेयंस्त्री
पोत्रमघंनरोदात्तिप्राजापत्यंस्थस्थालीपाकस्यहुत्वाहृदयदेशमस्याआलभे
तयत्तेसशीर्महृदयंहितमंतःप्रजापतौ॥मन्येहमातद्विद्वांसंमाहंपोत्रमघंनिया

श्रीराम
॥ ७ ॥

सिन्ना

मिति॥१३॥चतुर्थेगर्भमासेसीमंतोन्नयनंमापूर्यमाणपक्षेपुष्यहस्तेनपुंसानक्षत्रेणचंद्रमायु
क्तस्याहुत्वाग्निमुपसमाधायपश्चादस्यानडुहश्चर्मास्तीर्यग्राग्ग्रीवमुत्तरलोमतस्मिंनु
पविष्टायांसमन्वारब्धायाधातादधानुदाशुषइतिद्वाभ्यांराकामहामितिद्वाभ्यांने
जमेषप्रजापतेनत्वदेतान्यन्मइतिचाथास्यैयुग्मनशलाद्वयलघुनक्त्येष्याचशलल्या
त्रिभिश्चकुशपिंजूलैरूर्ध्वंसीमंतंव्यूहतिभूर्भुवस्वरोमितित्रिश्चतुर्वीणागाथि
नोसंशास्तिसोमंराजानंसंगायतामितिसोमोनोराजावतुमानुषीःप्रजानिविक्षव
कासावितियांनदीमुपवसथोभवतिब्राह्मण्यश्चहोत्रीवपत्योजीवप्रजायघटु
पदिशेयुःस्तत्तत्कुर्युर्ऋषभोदक्षिणा॥१४॥कुमारंजातंपुरान्येरालभात्सर्पिर्म
धुनीहिरण्यनिकाषंहिरण्येप्रनेनेक्षायेत्प्रतेदधामिमधुनोघृतस्यवेदंसवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राग्रसूतंमधोनां॥आयुष्मान्मुष्मादेवताभिःशतंजीवशरदोलोकेऽस्मिन्नि
तिकर्णयोरुपनिधायमेधाजननंजपतिमेधांतेदेवःसवितामेधांदेवीसरस्व
ती॥मेधांतेअश्विनौदेवावाधत्तांपुष्करस्रजाविति॥सावभिमृशत्यश्माभवपर
शुर्भवाहिरण्यमस्तृतंभव॥वेदोवपुत्रनामासिसजीवशारदःशतमितीमूर्द्धनित्रिरवघ्रायादृतेवकुमार्यै॥१५॥
षष्ठमास्यन्नंप्राजमन्नाद्यकामस्तेचिरंब्रह्मवर्चसकामोघृतोदनंजस्का मो
दधिमधुघृतमिश्रमन्नंप्राश्नीयादन्तेपतेन्नस्यनादेयनमीवस्यशुष्मिणः॥
अन्नपतान्नस्यनोदेह्यनमीवस्यशुष्मिणःप्रप्रदातारंतारिषऊर्जन्नोयहिहिषेरक्षतुष्यदृत्यादृतेवकुमार्यै॥१६॥
तृतीयवर्षेचोलंयथाकुलधर्मंवोत्तरतोग्नेर्व्रीहियवमाषतिलानांदृषदुप
पूर्णशरावाणिनिदधातिपश्चात्कारियिष्यमाणोमातुरुपस्थआनडुहंगो
मयेनवेश्नरावेश्नमीपर्णानिचोपनिहितानिभवंतिमातुःपितादक्षिण
तएकविंशतिकुशपिंजूलान्यादायब्रह्मावेतानिधारयेत्पश्चात्कारयि
ष्यमाणस्यावस्थायशीतोष्णाभ्यांसमानीयोलूनवायउदकेनहीतितो

त्रनामासिसजीवशारदःशतमितिमूर्द्धनित्रिरवघ्रायादृतेवकुमार्यै॥१५॥
षष्ठमास्यन्नंप्राजमन्नाद्यकामस्तेचिरंब्रह्मवर्चसकामोघृतोदनंजस्का मो
दधिमधुघृतमिश्रमन्नंप्राश्नीयादन्तेपतेन्नस्यनादेयनमीवस्यशुष्मिणः॥
अन्नपतान्नस्यनोदेह्यनमीवस्यशुष्मिणःप्रप्रदातारंतारिषऊर्जन्नोयहिहिषेरक्षतुष्यदृत्यादृतेवकुमार्यै॥१६॥
तृतीयवर्षेचोलंयथाकुलधर्मंवोत्तरतोग्नेर्व्रीहियवमाषतिलानांदृषदुप
पूर्णशरावाणिनिदधातिपश्चात्कारियिष्यमाणोमातुरुपस्थआनडुहंगो
मयेनवेश्नरावेश्नमीपर्णानिचोपनिहितानिभवंतिमातुःपितादक्षिण
तएकविंशतिकुशपिंजूलान्यादायब्रह्मावेतानिधारयेत्पश्चात्कारयि
ष्यमाणस्यावस्थायशीतोष्णाभ्यांसमानीयोलूनवायउदकेनहीतितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांगृहीत्वा नवनीतंसधिद्रप्सान्वाप्रदक्षिणंशिरस्किलकंरित्यरितिःकेशान्वपत्वा
पउंदंतुवर्चसइतिदक्षिणेकशपक्षेत्रीणित्रीणिकुशपिंजूलान्यभ्यात्माग्रा
णिनिधायाथैनंक्षुरेणायस्वनेस्वधितेमेनहिंसीरितिनिष्पीड्यलोहनक्षुण
रेग्रछिनत्तियनावपत्सवितास्तुरेणसोमस्यराज्ञोवरुणस्यबिद्वान्॥ते
नब्रह्मणावपतेदमस्यायुष्मान्जरदष्टिर्यथासदितिग्रछिघग्रछिघग्रा
गत्रान्तमीपर्णोःसहमात्रग्रयछतितानानुहरामयनिधातियेनथा
तान्हस्तेरग्नेरिद्धस्यायुषेवपत॥तेनतआयुषेवपामिसुश्लोकया ॥ शम ॥
यस्वस्तयइतिद्वितीयंयेनभूयश्चरात्र्याजोकंवपत्यातिसूर्यं॥तेनतऽ ॥ ९ ॥
आयुषेवपामिसुश्लोकायस्वस्तयइतितृतीयंसर्वमंत्रेश्चतुर्थमेवसुन

रतक्षिरःक्षुरतेजोनिमृजेद्यक्षुरेणमर्चयतासुपेशसावपसिकेशान्॥
शुंधिशिरोमास्यायुःप्रमोषीरितिनापितंशिष्याछीतोष्णाभिरद्भिरवर्थंकु
र्वाणोक्षण्वन्कुशलीकुर्वितियथाकुलधर्मंकेशवेशान्कारयेदृतेवकुमा
र्यै॥१७॥एतेनगोदानंषोडशेवर्षेकेशश्मश्रुदानंकारयेच्छमश्रू
णीहरंतिछंधिशिरोमुखंमास्यायुःप्रमोषीरितिकेशश्मश्रुलोमनखा
न्युदक्संस्थानिकुर्वितिसंप्रेष्यत्याचम्य वाग्यतःस्थित्वाहःशेषमाचार्य
सकाशेवाचंविसृजेतवरंदामीतिगामिथुनंदक्षिणासंवत्सरमाशि
ष्टं॥१८॥अष्टमेवर्षेब्राह्मणमुपनयेद्गर्भाष्टमेवैकादशेक्षत्रियंद्वाद
शेवैश्यमाषोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विंशाद्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन्नाध्यापयेन्न
याजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकुशलीकृताशिरसमहतेनवाससासं
वीतमणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियमाजेनवैश्यंयदिवासांसि
वसीरन्नक्कानिवसीरन्काषायंब्राह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवैश्यस्ल
वांमेखलामौंजीब्राह्मणस्यधनुर्ज्यौक्षत्रियस्यावीवैश्यस्यतेषांदंडाःपा
लाशोब्राह्मणस्यौदुंबरःक्षत्रियस्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मस्यल
लाटसंमितःक्षत्रियस्यप्राणसंमितोवैश्यस्य॥१९॥सर्वेवासर्वेषांसमन्त
वारब्धेकुंडेनरतोग्नेःप्राङ्मुखआचार्योपतिष्ठतेपुरस्तात्सत्यंऋतवइ
तरोपामंजलीपूरयित्वातत्सवितुर्वृणीमहइतिनास्यपूर्णमवक्षारयत्या

पूर्ण

भवतूर्ब्राह्मणोभिक्षांयाचेतभवन्मध्यंदिनेभवंस्यांवेदयः॥२०॥इतिपरिशिष्टं॥

सिच्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावि
तितस्यपाणिनापाणिंसांगुष्ठंगृह्णामियोसावितातेहस्तमग्रभीदसावितिहि
तीयमग्निराचार्यस्तवासावितृतृतीयमादित्यमीक्षयेदेवसवितरेषतेब्रह्म
चारीतंगोपायसमामनंत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसि
कस्त्वाकमुपनयतेकायत्वापरिददामीतियुवासुवासाःपरिवीतआगाद्दि
त्यईत्यैनंप्रदक्षिणमावर्तयेत्तस्याध्यंसोपाणीकृत्वाहृदयदेशमालभेतो
त्तरेणाग्निंपरिसमुह्यब्रह्मचारीतूष्णींसमिधमादध्यात्तूष्णींवेप्राजापत्यंप्रा
जापत्याब्रह्मचारीभवतीतिविज्ञायते॥२०॥मंत्रेणहैकेनत्रयसमिधमाहार्षं
बृहतेजातवेदसे॥तयात्वमग्नेवर्धस्वसमिधाब्रह्मणावयंस्वाहतिसमाभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धमाधायाग्निमुपस्तृण्यमुरंवनिमार्ष्टित्रिस्तेजसामासमनज्मीतितेजसाएवास्मा
नंसमनक्तीतिविज्ञायते॥मयिमेधांमयिप्रज्ञांमय्यग्निस्तेजोदधातु॥मयिमेधां
मयिप्रज्ञांमयीद्रइंद्रियंदधातु॥मयिमेधांमयिप्रज्ञांमयिसूर्योभ्राजोदधा
तु॥यन्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासं॥यन्तेअग्नेवर्चस्तेनाहंवर्चस्वीभू
यासं॥यन्तेअग्नेहरस्तेनाहंहरस्वीभूयासमित्युपस्थायजान्वाच्योपसंगृह्य
ब्रूयाद्दधिहिभोः३सावित्रींभो३अनुब्रूहीतितस्यवासमापाणिभ्यांचपा
णीसंगृह्यसावित्रीमन्वाहपश्चाद्ग्नेर्वेशः सर्वायथाशक्तिवाचयीतहृदयदे
शेस्योर्ध्वोगुलिपाणिमुपदधातिममब्रह्मतेहृदयंतेदधामिममचित्तमनुचि
त्तंतेअस्तु॥ममवाचमेकव्रतोजुषस्वबृहस्पतिष्ट्वानियुनक्तुमह्यमिति॥

गम्
॥११॥

यंदुरुक्तात्परिबाधमानाद्वार्मवरूथंपुनतीनआगात्॥प्राणापानाभ्यांबलमाभरंतीप्रियादेवानांसु
भगामेखलेयं॥सतस्यगोप्त्रीतपसःपरस्वीघृतीरक्षःसहमानाअरातीः॥सानःसमंतमनुपरीहिभ
द्रयाभर्त्तारंस्तेमेखलेमारिषामतिस्वस्तिनोअभीतेति॥

॥२९॥मेखलामाबध्यदंडंप्रदायब्रह्मचर्यमादिशेद्ब्रह्मचार्यस्यपोशानकर्मकु
रुद्वामास्वाग्नीराचार्याधीनोवेदमधीष्वेतिद्वादशवर्षाणिवेदब्रह्मचर्यग्र
हणांतंवासायप्रातर्भिक्षेतसायंप्रातःसमिधमादधादग्नयेत्वाव्यायिनमग्ने
भिक्षेताग्नयेत्वाव्यायिनीवाप्तवान्नभिक्षादेहीत्यनुप्रवचनीयमितिवात
राचार्यायवेदयीतातिष्ठेद्दहःशेषमस्तमितेब्रह्मोदनमनुप्रवचनीयंश्रपयि
त्वाचार्यायवेदयीताचार्यःसमन्वारब्धेजुहुयात्सदमस्यतिमद्भुतमितिसावि
त्र्याहुतीर्यंयद्यत्किंचातऊर्ध्वमनक्तंस्याद्दृषिभ्यस्तृतीयंसोविष्टकृतंचतु
र्थंब्राह्मणान्भोजयित्वावेदसमाप्तिंवाचयीतातऊर्ध्वमक्षारालवणाशीब्र
ह्मचार्येधःशायीत्रिरात्रंद्वादशरात्रंसंवत्सरंवाचरितव्रतायमेभाजननं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करोत्यनिंदितायांदिश्येकमूलंपलाशंकुशस्तंबंवापलाशशाखांवारेंऽग्रदक्षिण
सुदकुंभेनत्रिःपरिषिंचंतंवाचयतिसुश्रवःसुश्रवाऽसियथात्वंसुश्रवः
ऽसुश्रवाऽस्येवंमांसुश्रवःसोश्रवसंकुरु॥यथात्वंदेवानांयज्ञस्यनिधिपो
स्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासमित्येतेनवापनादिपरिदानां
तंव्रतादेशनंव्याख्यातमित्यनुपेतपूर्वस्याथोपेतपूर्वस्यकृताकृतकेश
वपनमेधाजननंचानिरुक्तंपरिदानंकालश्चैतत्सविलुर्वणीमहऽइति
सावित्रीं॥२२॥ऋत्विजोवृणीतेन्यूनातिरिक्तांगान्येमाद्यतःपितृतश्चैतिय
थोक्तपुरस्तोरघूनऋत्विजोवृणीतइत्येकब्रह्माणमेवाग्रथमंवृणीतेथहोता
रमथाध्वर्युमथोद्गातारंसर्वान्वायेहीनेकाहेयोजयंतिसदस्यंसप्तदशंकी

षीतकिनःसमामनंतिसमानकर्मणामुपद्रष्टाभवतीतितदुक्तमाथ्यांयमृत्विजोबहुधा
कृत्ययंतइतिहोतारमेवाग्रथमंवृणीतेग्निर्मेहोतासमेहोताहोतारंत्वासुवृणइतिहोता
रंत्वंद्रमामेब्रह्मासमेब्रह्माब्रह्माणंत्वासुवृणइतिब्रह्माणमादित्यामेध्वर्युरित्यध्वर्यु
पर्जन्यामउद्गातेत्युद्गातारमापोमेहोत्राशसित्यइतिहोत्रकाःसूरश्चयामेचमसाध्वर्य
वइतिचमसाध्वर्यूनाकाशंमसदस्यइतिसदस्यमृतोऽजपन्मऽइतिवाचाभर्गोमेवा
चोभर्गोमेवाचायशोमेवाचःस्तोममेवाचःकूचिमेवाचोभुक्तिंमेवाचस्तस्तिंमेवाचः
सर्वंमेवाचइतिजपित्वाग्निंहोतासतेहोतापूर्वेहोतारंतमाचुषइतिहोताग्रतिष्ठानी
तेचंद्रमास्तेब्रह्मासतेब्रह्माग्रस्तवमितरयथादर्शंतन्मामवतुतन्मावित्तुतन्मा
जिन्वेतुतेनसुक्षिषीयेतिचयाजयिष्यन्यस्तमार्त्विज्यमकार्यमहीनस्यनीचदक्षिण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यव्याधितस्यातुरस्ययक्ष्मगृहीतस्यानुदेश्यमिशस्तस्यक्षिप्तयोनेरिति वैषातेसोम
प्रवाकंपरिष्टौछेत्कायन्नः कन्नरत्विजः कादक्षिणेतिकव्याणेः सहसंप्रयोगोनमांसमश्नी
युर्नस्त्रियमुपेयुराक्रतोरपवर्गादेतेनाग्नेब्राह्मणावावृधस्वेतिदक्षिणाग्नावाज्याहुतिं
हुत्वायथा प्रव्रज्यादेवमनाहिताग्निर्ग्रह्यइमामग्नेरारणींमीमृषोनइत्येतयर्चा॥ २३॥ ऋत्विजो
वृत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायराज्ञेचाचार्यश्वशुरपितव्यमातुलानांचदधनिमधुनीयस
र्पिर्वामध्वलाभेविष्टरः पाद्यमर्घ्यमाचमनीयंमधुपर्कोगौरित्येतेषांत्रिस्त्रिरेकैकंवेदयंतेहवर्ष्मसजा
तानांविद्युतामिवसूर्यः॥ इदंतमधितिष्ठामियोमाकश्चाभिदासतीत्युदगग्रेविष्टरउपविश्येहाक्रम्यवा
पादौप्रक्षाल्यापयीतदक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यंशूद्रायप्रक्षालितपादोर्घ्यंजलिनाप्रतिगृ
ह्याथाचमनीयेनाचामत्यमृतोपस्तरणमसीतिमधुपर्कमाक्रियमाणमीक्षतेमित्रस्यत्वाचक्षुषाप्रती ॥१३॥

क्षेइतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्योंप्रतिगृह्णामीतितंजलिनाप्रतिगृह्यस
व्येपाणौकृत्वांमधुवातास्रुतायतइतितत्चेनावेक्ष्यानामिकयाचांगुष्ठेनचत्रिःप्रदक्षिणमालोड्यवसव
स्त्वागायत्रेणछंदसाभक्षयंक्षितिपुरस्तान्मार्ष्टिरुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंक्षितिदक्षिणतआदि
त्यास्त्वाजागतेनछंदसाभक्षयंक्षितिपश्चाद्विश्वेत्वादेवाआनुष्टुभेनछंदसाभक्षयंक्षित्युत्तरतोभूतेभ्य
स्त्वेतिमध्यान्निरुह्यविराजोदोहोसीतिप्रथमंप्राश्नीयाद्विराजोदोहमशीयेतिद्वितीयंमयिदोहःपद्यायै
विराजइतितृतीयंनसर्वंनदृष्टिंगच्छेद्ब्राह्मणायेदुच्छिष्टंप्रयच्छेल्लाभेप्यसर्वंवाथाचमनीयेनाचामे
त्यमृतापिधानमसीतिसत्यंयशःश्रीर्मयिश्रीश्रयतामितिद्वितीयमाचांतोदकायगांवेदयंतेहतोमेपाप्मा
पाप्मामेहतइतिजपित्वोंकुरुतेतिकारयित्वन्मातारुद्राणांदुहितावसूनामितिजपित्वोमुत्सृजतेत्युत्सृज्य
न्वामांसोमधुपर्कोभवतिभवति॥ २४॥॥ ७॥ ॥इतिस्मार्तसूत्रेप्रथमोध्यायः॥ ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ २८ ॥ ॥ हरिः ॐ ॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्मीक्षतसक्तूनां नवकलशं पूरयित्वा दर्वीं च बलिहरणीं
नवेऽग्निक्येनिदधात्यक्षतधानाः कृत्वा सर्पिषार्द्धा अनक्त्यस्तमिते स्थाली पाकं श्रपयित्वैककपालं चरुं
॥ १४ ॥ कार्त्तमग्ने नयसुपथाराये अस्मानिति चतसृभिः प्रत्यृचं हुत्वा पाणिनैककपालमच्युताय भौमाय स्वा
हेत्यविप्लुतस्यादाविः पृष्ठो वा मानो अग्ने वसुजो अघाय इत्येनमाज्येनाभिजुहोति शं नो भवंतु वाजि
नो हवेषित्यक्षधानाञ्जलिनामात्येभ्य इतरादद्यात्कलशात्सक्तूनां दर्वीं पूरयित्वा प्राग्गुपनिष्क्रम्य
शुचौ देशे पोवनिनीयसर्पिरेवजनेभ्यः स्वाहेति हुत्वानमस्करोति ये सर्पाः पार्थिवा अंतरिक्ष्या ये दिव्या
ये दिश्यास्तेभ्य इमं बलिमहार्षं तेभ्य इमं बलिमुपाकरोमीति प्रदक्षिणं परीत्य पश्चाद्बलेरुपविश्य सर्पो
सिसर्पतां सर्पाणामधिपतिरस्यन्नेनमनुष्यांस्त्रायसे पूषेन सर्पाञ्जेन्ये नरे वास्त्वयि मासंतं त्वयि संतः
सर्पीमाहिंसिषुर्ध्रुवांते परिदरामीति ध्रुवामंते ध्रुवामुतास्त्यमात्मानमनुपूर्वं ध्रुवमंते परिदरामी

त्मानमंततो नेनमंतराव्यधेयुरापरिदानात्सर्पदेवजनेभ्यः स्वाहेति सायंप्रातर्बलिहरेदाप्रत्यवरो
हणात्संस्रव्यायहेकेतावतो बलींस्तद्धरेवोपहरंति ॥ १ ॥ आश्वयुज्यामाश्वयुजीकर्मनिवेशनम
लंकृत्य स्नाताः शुचिवाससः पशुपतयेस्थालीपाकं निरूप्याजुह्वयुः पशुपतये शिवायशंकरायेषा
तकायस्वाहेतीषातकमंजलिनाजुह्वयादूनंमेपूर्यतांपूर्णंमेमोपसदत्षातकायस्वाहेतिसजूर्ऋ
तुभिः सजूर्विधाभिः सजूरिंद्राग्निभ्यांस्वाहा ॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वेभ्योदेवेभ्यः स्वा
स्वाहा ॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथिवीभ्यांस्वाहेत्याहिताग्नेराग्रयणस्थालीपाकेना
नाहिताग्नेरपि ग्रालाग्नौ ॥ २ ॥ मार्गशीर्ष्यांप्रत्यवरोहणंचतुर्ष्वन्यांपौर्णमास्यांवा निवेशनंपुनर्नवी
करणलेपनस्तरणोपस्तरणैरस्तमिते पायसस्याजुह्वयुरपश्वेतपदाजहिपूर्वेणचापरेणच ॥ सप्तच
वारुणीरिमाः सर्वाश्चराजबांधवीः स्वाहा ॥ नवैश्वेतश्चाक्षागरेहिर्जघानकिंचन ॥ श्वेतायवैदार्वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनमः स्वाहेतिनात्रसोविष्टकृदभयन्नः प्राजापत्येभ्योभूयादित्यग्निमीक्षमाणोजपतिशिवोनःसमना
भवेतिहैमंतेमनसाध्यायेत्सश्चाद्ग्नेःस्वस्तरस्यास्तीर्णेस्तस्मिन्नुपविश्यस्योनाएथिविभवेतिजपित्वा
संविशेत्सामात्यः प्राक्शिराउदग्शुरवोयथानकाश्मितरेज्यायान्ज्यायान्वानंतरोमंत्रविरोमंत्राज्ज
येयुःसंहायातोदेवाअवंतुनइतित्रिरेतांदक्षिणामुखाः प्रत्यङ्मुखाउदङ्मुखाश्चतुर्थेसंहायसोयदि
णिस्यस्यायनान्निचजपित्वानंसंस्कृतब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत॥३॥हेमंतशि
शिरयोश्चतुर्णीमपरपक्षाणामष्टमीमष्टकाएकस्यांवापूर्वेद्युःपितृभ्योदद्याद्दोदनंसक्तूंसर्पायसंच
तुःश्रावस्यवापूपानुदीरतामवरउसरासइत्यष्टाभिर्हुत्वायावतीभिर्वाकामयीतापश्वोभूतेष्टकाःप
शुनास्थालीपाकेनचाप्यनुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेतिनखेवानष्टकःस्या
त्तांहैकेदेवेभ्यदेवीमुवतआग्नेयीमेकेसौर्यीमेकेप्राजापत्यामेकेरात्रिदेवतामेकेनक्षत्रदेवतामेकऋतुदे

॥१५॥

वतामेकेपितृदेवतामेकेपशुदेवतामेकेपशुकल्पेनपशुंसंज्ञप्यप्रोक्षणेपाकरणावद्यंवपामुत्खिद्य
जुहुयाद्धविषांजातवेदःपितृभ्योयत्रैनान्वेथनिहितान्पराकेमेदसःकुल्याउपेनान्त्स्रवंतुस
एतुआज्यिषःसंतुसर्पिषःस्वाहेत्यथावदानानांस्थालीपाकस्यचाग्नेनयसुपथारायअ
स्मानिहैतिग्रीष्मोहेमंतकृतवःशिवानोवर्षाःशिवाअभयाःशरंनः॥संवत्सरोधिपतिःप्रा
णदानोहोरात्रेकृणुतादीर्घमायुःस्वाहा॥शांताद्यौथिवीशिवमंतरिक्षंयोनोदिव्यभयंनो
अस्तु॥शिवादिशःप्रदिशउद्दिशानआपोविद्युतःपरिपांतुसर्वतःस्वाहा॥आपोमरी
चीःप्रवहंतुनोधियंतासमुद्रोवहंतुपार्थं॥भूतंभविष्यदभयंविश्वमस्तुमेब्रह्माधिरुक्षःस्वा
राक्षराणिस्वाहा॥विश्वेआदित्यावसवश्चदेवारुद्रागोक्षारोमरुतःसदंतु॥ऊर्जंप्रजा
मस्तंपिन्वमानःप्रजापतिर्मयिपरमेष्ठीदधातुस्वाहा॥प्रजापतेनत्वदेतान्यन्यःसोवि
श्वरूप्यंसमीब्राह्मणान्भोजयेदित्युक्तं॥४॥अपरेद्युरन्वष्टक्यंतस्येवमासस्यप्रकल्प्य

॥ योधा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणाग्नेयेऽग्निं सुपसमाधायपरिश्रित्योत्तरतःपरिश्रितस्यद्वारंरक्षोवासमूलेबर्हि
स्त्रिरपसलैरविधून्यन्यस्तीर्यहवींष्यासादयेद्धोहनंकुसरंपायसंस्थिमंथान्मधुमंथो
ऋचपिंडपितृयज्ञकल्पेनकृत्वामधुमंथवर्जं पितृभ्योदद्यात्स्त्रीभ्यश्चसुरांचाचामभि
॥१६॥ त्यधिकंकर्षेत्केडयोःषट्सक्वापूर्वासुपितृभ्योदद्याद्परासुस्त्रीभ्यएतेनमाध्या
वर्षप्रोष्ठपद्याअपरपक्षेमासिमासिचैवंपितृभ्योयुक्तप्रतिष्ठापयेन्नवावरान्भोजये
दयुजोवायुग्मान्वृद्धिपूर्तेष्वयुग्मानितरेषुप्रदक्षिणमुपचारोयवैस्तिलार्थैः॥५॥रथ
मारोक्ष्यन्नानापाणिभ्योचक्रेऽभिमृशेद्धंतेपूर्वंपादावारभेद्धहद्धयंतरेतेचक्रेवामद्ध
क्ष्य मक्षइत्यधिष्ठानेदक्षिणपूर्वाभ्यामारोहेद्धायोष्ठावीर्येणारोहामीद्रस्योजसाधिपत्ये
नेतिरथमीक्षमाणंमृशेदरश्मिकान्वाहतेनब्रह्मणोवस्तेजसासंगृह्णामिसत्येनवःसंगृह्णामी ॥१६॥

स्मिप्रवर्तमानेषुजपेत्स्त्रहस्तसनिंवाजमभिवर्तस्वरथइवप्रवहंवनस्पतेवीडुंगोहिभूया
इत्येतयान्यान्यपिवानस्यस्यानिस्थिरोगावोभवतांबीलुरक्षइतिरथांगमभिमृशेत्स्फ्रा
माणेपृथिवींद्यामनेहसमितिनावंनचरथेनयत्रास्थिनंवहंकरंवाविहासिनंप्रदक्षिणं
कृत्वाफल्गवतीःशारवाआहरेदन्यद्वाकौटुंबंसंसदमुपयायादस्माकमुत्तमंकृधी
त्याद्रित्यमीक्षमाणोजपित्वावरोहेदृषभंमासमानानामित्यभिक्रामन्वयमद्येंद्र
स्यप्रेष्ठाइत्यस्तंयास्यादित्येनद्यौर्दिवोदुहितरोविभातीतिव्युष्टायां॥६॥अथातोवा
स्तुपरीक्षांव्याख्यास्यामोविवहिष्यंभूमोषधिवनस्पतिवद्यस्मिन्कुशावीरिणंप्रभूतंकंटकिं क्षी
रिणंस्थूलमूलान्यरिक्षायोद्वासयेदमोपोर्गःशाकस्तिल्वकःपरिव्याधइतिवैतानियत्र
सर्वत आपोमध्यं समेत्यप्रदक्षिणंत्रायनीयंपरीत्यप्राच्यस्यैरेत्रप्रवहस्तेऽर्जु
त्सर्वंसमूहंसमस्त्रवेभक्तश्चारणंकार्स्येबह्वनंहभवतिदक्षिणाप्रवणेसभांमापयेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा द्यूताहभवतियुवानस्तस्यांकितवोःकल्हिनःस्यमायुकाभवंतियत्रसर्वआयः
प्रस्यंदेरन्सास्यस्त्ययन्ययूताच॥७॥अथैतैर्वास्तूपरीक्षेतजानुमात्रंगर्तंखात्वा
तैरेवपांसुभिःप्रतिपूरयेद्घिकेप्रशास्तंसमेवार्तंन्यूनेगर्हितंमस्तमितेपांपूर्णंपरि
वासयेत्सोदकेप्रशस्तमार्द्रेवार्तंशुष्केगर्हितंश्वेतंमधुरास्वादंसिकतोच्चरंब्राह्मणस्य
रक्तोहितंक्षत्रियस्यपीतंवैश्यस्यतत्सहस्रसीतंकृष्णायथादिक्समंचतुरस्रंमापयेदाय
तंचतुरस्रंवातच्छमीशाखयोदुंबरशाखयावाशांतातीयेनत्रिःप्रदक्षिणंपरिव्रजन्प्रोक्ष
त्यविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितत्चेनंवशांतरेषुशरणानिकारये
द्ध्रुवेध्रुवकांश्रीपालमित्यवधायपूर्वन्यास्यद्ध्रुवोभवतीतिविज्ञायतेमध्यमस्थूणा
यागर्तंवधायप्राग्ग्रीवंउदग्ग्रान्कुशानास्तीर्यव्रीहियवमतीरपआसेचयेदृच्युवाय ॥१७॥

भौमायस्वाहेत्यथैनामुच्छ्रीयमाणामनुमंत्रयेतेहैवतिष्ठनिमितातिष्ठिलास्तामिराव
र्तीमध्येपोषस्यतिष्ठंतीमाखाप्रापन्नधापवआखाकुमारस्तृणआवत्सोजायतांस
हा॥आखापरिस्रितःकुंभआदभ्रःकलशैरयन्निति॥८॥वत्राधीयमानंमंत्रेतेन
स्थूणामधिरोहवंशाद्राधीयआयुःप्रतरंदधानाइतिसदूर्वासुचतस्रुशिलासुम
णिकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेत्यरंगरोवावरीतित्रेधाबुध्नेवरत्रया॥इरा
मुहप्रशांस्त्यनिरामपबाधतामितिवाधास्मिन्नपआसेचयेदृतुराजावरुणोरव
तीभिरस्मीस्थानेतिष्ठतुमोदमानः॥इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसहसं
वित्रांक्लिस्यथेनछमयतिव्रीहियवमतीभिरद्भिर्हिरण्यमवधायशांतातीयेनत्रिःप्रदक्षि
णंपरिव्रजन्प्रोक्षत्यविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितत्चेनंमध्येगारस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थालीपाकंश्रपयित्वावास्तोष्पतेप्रतिजानीह्यस्मानितिचतसृभिःप्रत्यृचंजुहोत्वांसंस्पृ
र्त्यब्राह्मणान्भोजयित्वाशिवंवास्तुशिवंवास्त्वितिवाचयीत॥ ९॥उत्तरंगृहप्रपदनंबीजव
तोगृहान्त्रपद्येतक्षेत्रंप्रकर्षयेदुत्तरैःप्रोष्ठपदैःफल्गुनीरोहिण्यावाक्षेत्रस्यानुवातंक्षेत्र
स्यपतिनावयमितिप्रत्यृचंजुहुयाज्जपेद्धोमाःप्रतिष्ठामानाअनुमंत्रयेतमयोभूर्वातोज
भिवातूस्त्राइतिहाभ्यामायतीर्योसाम्धश्चतुर्बिलंमधोःपूर्णघृतस्यच॥ तानःसंतुप
यस्वतीर्ब्रह्मार्गोष्ठेघृताच्यः॥ उपमैतुमयोभुवऊर्जंचौजश्चबिभ्रतीः॥ डुहानाअक्षितंप
योमयिगोष्ठेनिविशध्वंयथाभवाम्युत्तमे॥ यादेवेषुतन्वमैरयंतेतिचसूक्तंश्रोषमागाची
यमेकेगणानासामुपतिष्ठेतांगुरुगवीनांभूतास्तप्रशस्तास्थशोभनाःप्रियाःप्रियोवोभू
यासंशंमयिजानीध्वंशंमयिजानीध्वं॥ ९०॥ ॥ ॥इतिस्मार्तसूत्रेद्वितीयोध्यायः॥ ॥ ॥ ॥१८॥
॥हरिःॐ३मूंजथातःपंचयज्ञादिवयज्ञोभूतयज्ञःपितृयज्ञोब्रह्मयज्ञोमनुष्ययज्ञइति

यदग्नौजुहोतिसदेवयज्ञोयद्बलिंकरोतिसभूतयज्ञोयत्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्याय
मधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञइतिह्मानेतान्यज्ञानहरहःकुर्वीत॥ १॥
अथस्वाध्यायविधिःप्राग्वोदग्वाग्रामान्निष्क्रम्यापआचम्यशुचौदेशेयज्ञोपवीत्युत्तरेवा
साद्भिर्णांमहदुपस्तीर्यप्राक्कूलानांतेषुप्राङ्मुखउपविश्ययोपस्थंकृत्वादक्षिणोत्तरौपाणीसंधाय
पवित्रवंतौविज्ञायतेपांवाएषऊंषधीनांरसोयद्दर्भाःसरसमेवतद्ब्रह्मकरोतिद्यावापृथिव्योःसं
धिमीक्षमाणःसंमीत्यवायधावायुक्तमात्मानंमन्येततथायुक्तोधीयीतस्वाध्यायमोंपूर्वाव्या
हृतयःसावित्रीमन्वाहपछोर्दूचंत्राःसर्वामितितृतीयं॥ २॥अथस्वाध्यायमधीयीतऋचोय
जूंषिसामान्यथर्वांगिरसोब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीतियद्वेदो
तेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यद्
थर्वांगिरसःसोमाहुतिभियद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताकृतिभिर्यद्दर्चोधीतेपयसःकुल्याअस्यपितॄन्त्स्वधाउपक्षरंतियद्यजूंषिघृतस्यकुल्या
यत्सामानिमध्वःकुल्यायरथर्वांगिरसःसोमस्यकुल्यायब्राह्मणानिकुल्यानाथानाराशं
सीरितिहासपुराणानीत्यमृतस्यकुल्याःसयावन्मन्येतावद्धीत्येतयापरिदधातिनमोब्रह्मणेन
मोअस्त्वग्नयेनमःपृथिव्यैनमऊषधीभ्यः॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहते करो
मीति॥३॥देवतास्तर्पयतिप्रजापतिर्ब्रह्मावेदादेवाऋषयःसर्वाणिछंदांस्योंकारोवषट्कारोव्या
हृतयःसावित्रीयज्ञाद्यावापृथिवीअंतरिक्षमहोरात्राणिसांख्याःसिद्धाःसमुद्रानद्योगिरयःक्षेत्रौ
षधिवनस्पतिगंधर्वाप्सरसोनागावयांसिगावःसाध्याविप्रायक्षारक्षांसिभूतान्येवमंत्रान्यथ
ऋषयःशतर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्याः
क्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतीकुरुतेमनुर्वैयत्किंचमनुरवदत्तद्भेषजंभेषजतायै
रतधर्माचार्याजानंतिबाहविगार्ग्यगौतमश्राकल्यबाभ्रव्यमांडव्यमांडूकेयागर्गवाचक्र

॥१९॥

वीवउवाप्रातीथेयीकुलभागमैत्रेयीकहोळंकौषीतकंमहाकौषीतकंपैंग्यंमहापैंग्यंसुयज्ञंसांख्या
यनमैत्रेयंमहैतरेयंशाकलंबाष्कलंसुजातवक्त्रमौद्वाहिंमहौद्वाहिंसौजामिंशौनकंमाश्वला
यनंयेचान्येजाचार्यास्तेसर्वेतृप्यंतितृप्तिप्रतिपुरुषंपितृंस्तर्पयित्वागृहानेत्यथद्वात्तिसाद्क्षिणा
थापिविज्ञायतेसयदितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधीतेतेनतेनास्यक्रतुनेष्टंभवती
तिविज्ञायतेतस्यद्वानेवेध्यायौयत्सास्रुच्चिर्यद्दोः॥४॥अथातोध्यायोपाकरणमोषधीनांप्रादुर्भा
वेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवाज्यभागौकृत्वाज्याहुतीर्जुहुयात्सावित्र्यैऋचेऽग्नयेमेधा
यैप्रज्ञायेधारणायैसरस्वत्यैछंदोभ्यऋषिभ्यश्चेत्यथरुधिरसक्तान्जुहोत्यग्निमीळेपुरो
हितमित्येकाकुसुभकस्तद्भवीदावद्स्त्वंशाकुनेभद्रमावरुणानाजमरग्निनाधामंतेविश्वंभुवनम
धिश्रितंगंतानोयज्ञंयज्ञियाःस्वग्नियोनःस्योअरणाप्रतिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायन्नेरा
जन्छतंहविरितिद्वयाःसमानीवआकूतिरित्येकोतछंयोरावणीमहइत्येकाध्येष्यमाणोध्यापयेरन्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुब्धृग्भ्यांदेवताभ्योऽऊत्वासोविष्टकृतंहुत्वाऽग्निंस्विष्टकृन्नाम्न्यंततोमार्जनंपरेणाग्निंप्राङ्मुखेऽ
धुरंभेषुपविश्योत्पात्रेदर्भान्कृत्वाऽञ्जलिकृताजपेदोंपूर्वांव्याहृतयस्सावित्रींचत्रिरभ्यस्यवेदादि
मारभेत्तथोत्सर्गेषणासानधीयीतसमावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरेजायोपयेयेकेप्रा
जापत्यंतद्वार्षिकमित्येतदाचक्षतेमध्यमाष्टकायामेताभ्योदेवताभ्योन्नेनहुत्वापोभ्यवयंत्येताएव
तदेवतास्तर्पयंत्याचार्यानृषींश्चितृंश्चैतदुत्सर्जनं॥५॥अथकाम्यानांस्नानेकाम्याश्चरवस्तानेवकामा
नाप्नोत्यथव्याधितस्यातुरस्ययक्ष्मगृहीतस्यवाषळाहुतिश्चरुर्मुचामित्याहविषाजीवनायकमित्येतन्मम
ममनोज्ञंदृष्ट्वाधानोदेवसवितरितिहाभ्यांयच्चगोषुदुःष्वप्न्यमितिपंचभिरादित्यमुपतिष्ठतेयोमराज्ञयुज्या
वासरथावेतिवाक्षुत्वाऽञ्जभित्वामनोज्ञंदृष्ट्वापापकंगंधमाघ्रायाक्षिस्यदनेकर्णध्वनने-वसुश्चक्षाअहु
मक्षीभ्यांभूयासंसुश्रवोमुखेनसम्भ्रुत्कर्णाभ्यांमयिदक्षक्रतूइतिजपेद्गमनीयागत्वायाज्ययाज
यित्वाभोज्यंभुक्त्वाप्रतिग्राह्यंप्रतिगृह्यवेत्यंयूपंवापहत्यपुनर्मामैत्विन्द्रियंपुनरायुःपुनर्भगः॥पुनर्ऊ
र्विणमेतुमापुनर्ब्राह्मणमेतुमांस्वाहा॥इमेयेधिष्ण्यासोअग्नयोयथास्थानमिहकल्पंतां॥वैश्वा

नरोवाहधानोन्तर्यज्ञंतुमेमनोदधंतरमृतस्यकेतुःस्वाहेत्याज्याहुतीर्हुत्वाऽग्निधोवाजपेद्वा॥६॥
अव्याधितंवेत्स्वपंतमादित्योभ्यस्तमियाद्वाग्यतानुपविश्यत्रात्रिशबभूत्वायनसूर्यज्योतिषाबा
धसेतमदितिंपंचभिरादित्यमुपतिष्ठताभ्युदियाच्चेदकर्मश्रांतमनभिरूपेणकर्मणावाग्यतदितिस
मानमुत्तराभिश्चतसृभिरुपस्थानंयज्ञोपवीतीनित्योदकःसंध्यामुपासीतवाग्यतःसायमुत्तरा
परामभिमुखोन्वक्षमदेशंसावित्रींजपेदर्द्धास्तमितमंडलआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्ति
ष्ठेनामंडलदर्शनात्कपोतश्चेदगारमुपहन्यादनुपतेहरेधाःपोकेतदितिप्रत्यञ्जुहुयाज्जपेद्वा
वयमुत्वापथस्पतइत्यर्धर्चयांचरिष्यन्त्संपूषन्विदुषतिनस्पथिजिगमिषन्मूढोवासंपूषन्नघृ
णेतिमहांतमध्वानमेष्यन्नृतिभयंवा॥७॥अथैतान्युपकल्पयीतसमावर्तमानोमणिंकुंडले
वस्त्रयुगंछत्रमुपानद्युगंदंडंस्रजमुन्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मनेचाचार्यायचव
यद्युभयोर्नविंदेताचार्यायैवसमिधंत्वाहरेदपराजितायांदिशियस्मिंयस्यवृक्षस्याहृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाधकामःपुष्टिकामस्तेजस्कामोवाब्रह्मवर्चसकामउपवातानुभयीरुभयकामउपरिसमिधंकु
ल्यागामंनंवब्राह्मणेभ्यःप्रदायगोदानिकंकर्मकुर्वीतात्मनिमंत्रांस्तंनमयेदंकृतंकरोतो
ष्ठामिरड्डिस्तात्वायुवंवस्त्राणिपीवसावसाथइत्यहतेवाससीआच्छाद्याश्मनस्तेजोसिचक्षु
र्मेपाहीतिचक्षुषीआंजयीताश्मनस्तेजोसिश्रोत्रंमेपाहीतिकुंडलेआबध्नीतानुलेपनेनपा
णीप्रलिंप्यमुखमग्रेब्राह्मणानुलिंपेद्वाकूराजन्यउदरंवैश्यउपस्थंरूप्यूरूसरणजीविनौनार्तो
स्यनार्तोहंभूयासमितिस्त्रजमपिबध्नीतनमाछोक्तांमालतिचेत्यूयुस्त्रगित्यभिधापयीतेद
वानांप्रतिष्ठस्थःसर्वतोमापातमित्युपानहावास्थायदिवश्छायासीतिछत्रमादत्तेवेणुरसिवा
नस्पत्योसिसर्वतोमापाहीतिवेणुंदंडमायुष्यमितिसूक्तेनमणिंकंठेप्रतिमुंचेच्छीषंकृंतातिष्ठ
न्त्समिधमादध्यात्॥८॥स्मृतंनिंदाचविद्याचश्रद्धाप्रज्ञाचपंचमी॥इंद्रंदत्तमधीतंचकृतंसत्यंश्रु
तंव्रतं॥यदग्नेसंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिराजन्यस्यसपितृकस्यसपितृराज

॥सू॰॥ ॥२१॥

न्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाशस्यसानूकाशस्यसप्रतीकाशस्यसदेवमनु
ष्यस्यसगंधर्वाप्सरस्कस्यसहारण्येश्वपशुभिर्ग्राम्येश्वयन्मआत्मनआत्मनिव्रतंतन्मेसर्वव्रतमि
दमहमक्षतेसर्वव्रतंमेभवामिस्वाहेतिमणिंबध्नीयात्प्रत्यंचंसमिधोभ्यादध्याद्यत्रेनपूजयिष्यतो
भवंतितत्रेतांरात्रींवसेद्यातेयुरुमर्थेनमंत्र्यरुतानुज्ञातस्यवास्तानंतस्यैतानिव्रतानि
भवंतिननक्तंस्नायीननग्नःस्नायीननग्नःशयीतननग्नांस्त्रियमीक्षेतांत्यत्रमैथुनादूर्ध्वंतिन
धावेन्नवृक्षमारोहेन्नकूपमवरोहेन्नबाकुभ्यांनदीतरेन्तशंसेयमभ्यापद्येतमहद्भूतंस्यात
कोभवतीतिविज्ञायते॥९॥गुरवेप्रस्तूयमाणोनामब्रूयात्तेदंवस्यामोमोहइत्युच्चैरुच्चैर्नाम्नः
प्राणापानयोरुपांशवामंइरिंद्रहरिभिरितिचांतेवृद्धोजपतिप्राणापानयोरुरुव्यचास्तया
प्रपद्येदेवायसवित्रेपरिददामीत्यंचंसमाप्योप्राक्षुस्तीतिजपित्वामहिन्नीणामित्यनुम
त्र्येवमतिसृष्टस्यनकुतश्चिद्भयंभवतीतिविज्ञायतेवयसाममनोज्ञावाचःश्रुत्वाकुनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्ज्जानुषंप्रब्रुवाणइतिसूक्तेजपेद्देवींवाचमजनयंतदेवाइतिचस्तुहिश्रुतंगर्तसदंयुवानमिति
रुगस्यथस्यादिशोविधीयाद्यस्माद्दातांदिशमुमुलेकमुभयतःप्रतीक्षंप्रत्यस्येन्मथंवाप्रसव्य
मालोड्याभयंमित्रावरुणामद्यमस्त्वर्चिषाशरूद्दृंहंतंप्रतीत्यमाज्ञातारंमाप्रतिष्ठांदृंहुमि
थोषिंदानाउभयंतुमद्युमितिसंस्रुधनमुभयसमाकृतमितिमंथंत्यंचकरोति ॥३०॥ ॥
सर्वतोभयादनाज्ञातादृष्टाद्याऽकृतीर्जुकुर्यात्पृथिवीदृतासाग्निनादृतातयादृतयावर्त्र्यायस्मा
द्ध्याहिभेमितद्धारयेस्वाहा॥अंतरिक्षंदृतंतद्धायुनादृततेनदृतेनवर्त्रेणयस्माद्ध्याहिभेमितद्धा
रयेस्वाहा॥द्यौर्दृतासादित्येनदृतातयादृतयावर्त्र्यायस्माद्ध्याहिभेमितद्धारयेस्वाहा॥दि
शोदृतास्ताभ्रंद्रमसादृतास्ताभिर्दृताभिर्वर्त्रेभिर्यस्माद्ध्याहिभेमितद्धारयेस्वाहा॥आपो रामू
दृतास्तावरुणेनदृतास्ताभिर्दृताभिर्वर्त्रेभिर्यस्माद्ध्याहिभेमितद्धारयेस्वाहा॥प्रजादृता. ॥२२॥
स्ताःप्राणेनदृतास्ताभिर्दृताभिर्वर्त्रेभिर्यस्माद्ध्याहिभेमितद्धारयेस्वाहा॥वेदादृतास्तेछ

दोभिर्दृतास्तेर्दृतैर्वर्त्रैर्यस्माद्ध्याहिभेमितद्धारयेस्वाहा॥सर्वंदृतंतद्ब्रह्मणादृततेनदृतेनवर्त्रेणय
स्माद्ध्याहिभेमितद्धारयेस्वाहेत्यथापराजितायांदिशियवस्रायंस्वस्त्यानेयंत्रयतियतरद्भया
मरुद्भतिवसूक्तशेषं॥११॥संग्रामसमुपोळ्हेराज्ञांसंलाहयेदावाहाषंमतरधीतिपश्चाद्ध्यस्या
वस्रायज्ञीमूतस्यवभवतिप्रतीकमितिकवचंप्रयछेदुत्तरयाधनुरुत्तरांवाचमेत्स्वयंचतुर्थइ
जपेयंचम्येषुधिंप्रयछेदभिप्रवर्तमानेषुसंसम्याश्चानडुहीमिषुनवक्षमाणांवाचयत्य
हिरिवभोगैःपर्यतिबाहुमितिततंनत्यमानमर्थेनसारयमाणमुपारुह्याभीवर्तंवाचयति
प्रयोधांमित्रावरुणेतिचहुंअथेनमन्वीक्षेताप्रतिरथशासत्सोपर्णैःप्रधनायंतुमधुनो
पतस्थेत्यतत्सोपर्णंसर्वादिशानुपरियायादादित्यमीक्षनसंवावस्रायंप्रयोधयेद्रुप
श्वासयपृथिवीमुतयामितिततश्चेनदुदुंभिमभिमृशेदवस्फलापरापततीषूनिसृजेयथ
त्रबाणाःसंपततीतिचयुध्यमानेषुजपेत्सशिष्याद्वासशिष्याद्वा॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिस्मार्तसूत्रेतृतीयोध्यायः॥ ॥ ॥हरिः ओ३म्॥ ॥ ॥आहिताग्निश्चेद्दुपतपेत्साध्यामु
दीच्यामपराजितायांवादिश्युदस्येद्ग्रामकामाअग्नयइत्युदाहरत्याशंसतएनंग्राममाजिगमि
षतोगदंकुर्युरितिहविज्ञायतेगदसोमनपशुनस्यशुष्कस्येदनिष्ठावासंस्थितभूमिभागंखान
येद्दक्षिणपूर्वस्यांदिशिदक्षिणापरस्यावादक्षिणाग्रेणैवाग्रादक्षिणाग्रवणंवाग्रत्यग्दक्षिणा
ग्रवणमित्येकयावानुद्धाङ्कःपुरुषस्तावदायामंव्याममात्रंतिर्यग्वितस्त्यवागभितआका
शंश्मशानंबङ्कलोषधिकंकंटकिशीरिणस्स्थितियथाकंपुरस्ताद्यत्रसर्वतआपःप्रस्यंदरन्त
तदाहनस्थलक्षणंश्मशानस्यकंशश्मश्रुलोमनखानीत्युक्तंपुरस्ताद्धिरण्यंबहिराज्य
चरुंचन्यत्रसर्पिरानयंत्यतस्सिक्त्यंघृषराज्यं॥१॥अथैतांदिशमग्नीनयंतियज्ञपात्राणि
चान्वग्नंव्रतमयुजोमिथुनाःप्रवयसःपीठंचक्रुर्गोयुक्तंस्यनैकंतुस्तरणीगामजांवेक
वर्णांकृष्णामेकंसव्येबाहोबध्नानुसंकालयंत्यंचामात्याअधोनिवीतंप्रवृत्तशि

खाज्येषुप्रथमोःकनिष्ठजघन्योःप्राप्येवंभूमिभागंगर्तोदकेनशमीशाखयोत्रिःप्र
सव्यमानायतनंपरिव्रजन्नाक्षेत्यपतवीतंविच्छर्पतातइतिदक्षिणापूर्वउद्धृत्यत
आहवनीयंनिदधात्युत्तरपश्चिमंगार्हपत्यंदक्षिणपश्चिमंदक्षिणतोरथनमंतर्वेदी
मचितिंचिनोतियाजानातितस्मिन्बर्हिरास्तीर्यकृष्णाजिनंचोत्तरलोमतस्मि
न्नंतंसंवेशयंत्युत्तरेणगार्हपत्यंदत्वाहवनीयमभिमुखशिरसमुत्तरतःपत्नीय
नुश्चक्षत्रियायतामुत्थापयेदवरःप्रतिस्थानीयंतेवासीजरदाससोदीर्घयेनो
भिजीवलोकमितिकर्त्तावृषलेजपेद्धनुर्हस्तादादत्तामृतस्यतिधनुरुक्तंवृष
लेधिज्यंकृत्वासंचितिमचित्वासशीर्षानुग्रहरतु॥२॥अथैतानिपात्राणियो
जयेद्दक्षिणेहस्तेजुहूंसव्येउपभृतंदक्षिणेपार्श्वस्थ्यंसध्यग्निहोत्रहवणीमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसधृवांशिरसिकपालानिदक्षस्रावणानासिकयोस्रुवेभित्वाचेकंकर्णयोःप्राशि
त्रहरणेभित्वाचेकमुदरपात्रीसमवत्तधानंचचमसमुपस्थेशम्यामरणीऊवीकुलूरव
लमुसलेजघयोःपादयोःश्रपित्वाचेकमासेचनवंतिषदाज्यस्थपूरयत्यमा
पुत्रोदृषदुपलेकुवश्तलोहायसंचकोलालेमनुस्तरण्यावपामुत्तिवद्यशिरोमुखंप्र
छादयेदन्नवैमपरिगोभिर्व्यवस्यतिदक्षाउदुत्यपाण्यारादध्यादितिदृवसारमया
श्वानाविति ॥० दक्षिणेदक्षिणंसव्यंसव्येहृदयेहृदयंपिंडाचेकदृक्कापचार
इत्येकेसर्वांयथांगंवितिक्षिप्यचर्मणाप्रछाद्यमनत्रचमसंमार्जिकुरुतिप्रणी
ताप्रणयतमनुमंत्रयतेसव्यंजान्वाच्यदक्षिणास्तावाज्याहुतीर्जुहोतिदत्तयस्वा
हाकामायस्वाहोलोकायस्वाहानुमतयेस्वाहेतिपंचमीमुरसिप्रतस्योस्माहृत्वम

जायथोऽयंत्वदधिजायतांमसोस्वर्गायलोकायस्वाहेति॥३॥प्रेष्यतियुगपदग्नी
न्प्रेङ्खालयतेत्याहवनीयश्चेत्साहवंप्राप्नुयात्स्वर्गलोकंनंप्रापदितिविद्यादात्म्य
त्यसावमुत्रेवमयमस्मिन्तिपुत्रागार्हपत्यश्चेत्सूवंप्राप्नुयादंतरिक्षलोकंनं
प्रापदितिविद्यादात्म्यत्यसवपुत्रवमयमस्मिन्तिपुत्रोदक्षिणाग्निश्चेत्सूवंप्राप्नु
यान्मनुष्यलोकंनंप्रापदितिविद्यादन्तमवरात्म्यत्यसावमुत्रेवमयमस्मिन्नि
तिपुत्रायुंलाजोपरामर्शिवदतितदनुमानमनुमंत्रयतेप्रेहिप्रेहिपथिभिःपू
र्व्येभिरितिसमानंसर्वंविदादनुमानःसहवधूमनस्वर्गंलोकमतीतिविज्ञायतं
उत्तरपुस्तोरेदहवनीयस्यजानुमात्रंगतंरिक्वात्वौषकाशीपालमित्यवधापयं
स्ततोहवाएषनिक्रम्यसहवधूमनस्वर्गंलोकमतीतिविज्ञायतेऽमजीवाश्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेरावरुन्धन्तिसव्याहृतोव्रजत्यनवेक्षमाणायत्रोदकमवहृवतितत्राप्यसकृदुन्म
ज्यैकांजलिमुत्सृज्यतस्यगोत्रंनामचगृह्णीतीर्थानिवासांसिपरिधायसकृदेनान्यापो
ऽद्योदग्दशानिविसृज्यासतेऽानक्षत्रदर्शनादादित्यस्यवादृश्यमानप्रविशेयुःकृति
ष्वग्रथमाज्यष्ठजघन्योःप्राप्यागारंश्मानमग्निंगोमयमक्षतास्तिलानपउपस्पृशंति
नेतस्यांरात्र्यामन्नंपचेरन्क्रीत्वोत्पन्नेनवावतेरन्त्रिरात्रमक्षारालवणाशिनःस्युर्ह
दशरात्रंवोमहायुरुषुदानाध्ययनेवर्जयेरन्दशाहंसपिंडेषुगुरोश्चासपिंडस्यचास्रु
चस्त्रीषुत्रिरात्रमितरेष्वाचार्येषुज्ञातौचासपिंडस्यनक्षत्रेषुचस्त्रीषुदंतजातेपरिजाते
चैकाहंसव्रह्मचारिणिसमानग्रामीयेचश्रोत्रिये॥६॥संक्रयनमूर्ध्वंदशम्याः
कृष्णपक्षस्यायुजासुकनक्षत्रेलक्षणेकुंभेपुमांसंमलक्षणायांस्त्रियंमयुजासि

शुनाःप्रवयसःक्षीरोदकेनशमीशारक्यात्रिःप्रसव्यमायतनंपरिव्रजन्त्योक्षतिशीति
केशीतिकावतीत्यनुष्टापकनिष्टिकाभ्योमेकंकमस्थ्नांसंक्षादयंतोवदध्युःपादापूर्वंशि
रउत्तरंकृसंचितंसंचित्यपवमानेनसंपूर्यंयत्रसर्वतआपोनाभिःसंदरेत्तन्यावपी
त्यस्तत्रगर्तेवदध्युरुपसर्पमातरंभूमिमेतामित्युत्तरंपांसूनवकिरेदवकीर्यौत्तरा
मुत्तरेरुत्तानामीतिकपालेनापिधायोथानवेक्षंप्रत्याव्रज्योपउपस्पृश्यश्राद्धमेमद
यंः॥५॥गुरुणाभिमृतोऽभिप्लुतोवापक्षीयमाणोऽमावास्यायांशांतिकर्मकुर्व
न्त्युरोदयान्निंसहभस्मानंसहायतनंदक्षिणाहरेयुःकव्यादमग्निंप्रहिणोमिदू
रमित्यदूर्वेनंचतुष्पथेन्युप्ययत्रवात्रिःप्रसव्यंपरियंतिसव्येःपाणिभिःसव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वूरूनाघ्रानोऽथानवेक्षंप्रत्याव्रज्यापउपस्पृश्यैकशश्मश्रुलोमनखानिवाप
खित्वौपकल्प्यौरत्नवान्मणिकान्कुंभीनाचमनीयांश्चैशमीसूमनोमालिनी
शमीमयमिध्मंशमीमय्यावरणीपरिधीश्चोनडुहंगोमयंचर्मचनवनीतमश
मानंयावत्योयुवतयस्तावंतिकुशपिंजूलान्यग्निमीळायामध्रिंजनयदिती
हेवायमितरोजातवेदाइत्यर्चैनंतंदीपयमानाआसतेआशांतरात्रोदायु
मतांकथाःकीर्तयंतोमांगल्यानीतिहासपुराणानीत्याख्यापयमानाउपर
तेशब्देषुसंप्रविष्टेषुवाग्गृहंनिवेशनंवादक्षिणाद्वारपक्षास्रक्म्योविलिन्ना
मुदकधारांहरेत्तंतुतंवन्त्वरजसोभानुमन्विहीत्योत्तरस्मादथाग्निमुपसमा

धायपश्चादस्यानडुहंचर्मास्तीर्यग्रीवमुत्तरलोमतस्मिन्नमात्यानाराोहयेदा
रोहतायुर्जरसंवृणानाइतीमंजीव्यःपरिधिंदधामीतिपरिधिंपरिदध्योदंत
मेत्युदधतांपर्वतेनैत्यश्मानमुत्तरतोग्नेःकृत्वापरमत्याअनुपरेहिपथामितिच
तमभिःप्रत्यंचंकृत्वायथाहान्यनुपूर्वंभवंतीत्यमात्यानीक्षेतयुवतयःपथस्या
लिभ्यांदर्भतरुणकेनवनीतेनचोष्ठावंकनिष्किकाभ्यांमक्षिणीआंज्यापरांचो
विसृजेयुरिमानारीरविधवाःसुपत्नीरित्यंजनाइक्षेतोश्मन्वतीरीयतेसंरभ
ध्वमित्यश्मानंकर्तापथमोभिमृशेदथापराजितायांदिश्यवस्थायाग्निनानडुह
नगोमयेनचाविछिन्नयावोदकधारयोपोहिष्ठामयोभुवइतिमंत्रेणपरीमृशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनेषतेतिपरिक्रमत्कजपेत्सिंगलोनदुवापेनैरिणेयस्यादित्यदाहरंत्यथोपवि
शंतियत्राभिरंस्यमानाभवंत्यहतेनवाससाग्रछाघोसतेस्वपंत्कआदत्योदुदित्आ
दित्सेसार्यणिस्वस्त्ययनानिचजपितोत्तंसंस्रुत्यापनःशेशुचदघमितिप्रत्य
वंकुलोब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीतगोःकंसोहतंवासभ्रदक्षि
णा॥ ६॥ अथातःपार्वणश्राद्धंकाम्यंआभ्युदयिकएकोद्दिष्टोब्राह्मणाछ
तशीलसंपन्नानेकेनवाकालेज्ञापितोत्मातान्कृतपछोचनाचांतानुद
ङ्मुखान्मित्वदुपवेश्यैकैकमेकैकस्यद्वाद्वावींस्त्रीन्वावृद्धोफलभूयस्त्वेनते
वैकंसर्वेषांकाममनाद्यपिंडैर्व्याख्यातमपःप्रदायदर्भान्हिरण्यगुणमुत्तानासन

राम्
॥१॥

प्रदायापःप्रदायैतज्जसाश्ममयमन्नमेधुन्निधुपात्रेषेकद्व्येषुवोदर्भानहितेषपञ्चा
सिच्यशंनोदेवीरभिष्टयइत्यनुमंत्रितासकृतिलानावपतितिलोसिसोमदेवत्यो
गुसर्वदेवनिर्मितःप्रत्नवद्भिःप्रत्नस्वधयापितॄनिमान्लोकान्प्रीणयानःहि
स्वधानमइतिप्रसव्यंतरपाव्यंगुष्ठान्तरेणापवीतिलोहक्षिणंनसव्याप
गृहीतंनपितरिदंतध्यंपितामहदंतध्यंप्रपितामहदंतध्यमित्यपूर्वंताःप्रति
ग्राहयिष्यन्त्सकृत्सकृत्स्वधाअर्घ्याइतिप्रस्रुताअनुमंत्रयतेयाद्रिव्याआ
पःएषविवंभूवुर्याअरितेक्ष्याउतपार्थिवीयाः हिरण्यवर्णायज्ञिया
स्तानुआपःशंस्योनाभवंतितस्त्रवान्त्समवनीयताभिरद्भिःपुत्रकामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुखमनक्तिनोदरेस्थमंपात्रेपितृणामर्घ्यंपातितं॥आवृतास्तत्रतिष्ठंति
पितरःशोनकोब्रवीत्॥अुदरंयदिचेत्यात्रेविवृतंवायदाभवेत्॥तदासुरंभवेच्छ्रा
द्धंकुरुक्षेत्रेपितृगणेरिति॥७॥एतस्मिन्कालेगंधमाल्यधूपदीपाछादनानोप्रदा
नमुदकंयच्चान्यन्मन्त्रमनुज्ञापयत्यग्नौकरिष्येकरवैकरवाणीतिवाप्रत्यभ्यनु
ज्ञातोकुरुष्वकुर्वित्यग्नौजुहोतियथान्यूरस्तादभ्यनुज्ञायापाणिभ्यांवावो
त्सिमुरवावेदवोःपाणिमुरवाःपितरइतिहब्राह्मणोयदिपाणिभ्यांचातेषुन्यस्त
नमुपदिशेत्यन्नमन्नेसंसृष्टंस्यान्मधुकमितितस्मान्नालंमधुमतीश्रावयेद्
क्षन्नमीदंतातिवसंपन्नमितिसंस्रवंयद्यन्नमुपभुक्तंतेनतत्तालीपाकेनसह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.08.19 16:22
,TRANSFERRED=2019/08/06 at 16:29:54
,PAGES=31
,TYPE=STD
,NAME=S0001340
,Book Name=M-170-AASHRAVLAYAN GRAHSUTRA MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection